# ॥ नवग्रह स्तोत्र ॥

जपा कुसुम संकाशम् काश्यपेयं महद्युतिम् ।
तमोऽरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥१॥
दधि शंख तुषाराभं क्षीरोदार्णव संभवम् ।
नमामि शशिनं सोमं शम्भोर्मुकुट भूषणम् ॥२॥
धरणी गर्भ संभूतं विद्युत्कान्ती समप्रभम् ।
कुमारं शक्ती हस्तं च मङ्गलं प्रणमाम्यहम् ॥३॥
प्रियङ्गु कलिका श्यामं रूपेणां प्रतिमं बुधम् ।
सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम् ॥४॥
देवानां च ऋषीणां च गुरु काञ्चन संनिभम् ।
बुद्धीभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥५॥
हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम् ।
सर्व शास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम् ॥६॥
नीलाञ्जन समाभासं रविपुत्र यमाग्रजम् ।
छाया-मार्तण्ड संभूतं तं नमामि शनैश्चरम् ॥७॥
अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसंभूतं तं राहूं प्रणमाम्यहम् ॥८॥
पलाशपुष्प संकाशं तारका ग्रह मस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥९॥
इति व्यासमुखोद्गीतं यः पठेत्सुसमाहितः ।
दिवा वा यदि वा रात्रौ  विघ्नशान्तीभविष्यति ॥१०॥
नर नारी नृपाणां च भवेद् दुःस्वप्ननाशनम् ।
ऐश्वर्यम् अतुलं तेषाम् आरोग्यं पुष्टीवर्धनम् ॥११॥
ग्रह नक्षत्रजाः पीडा तस्कराग्नी समुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥१२॥

**॥ इति श्रीव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम् ॥**

या स्तोत्राचे २७००० पाठ मुला-मुलींनी १६व्या वर्षापर्यंत पूर्ण करावेत. म्हणजे भावी जीवनावर ग्रहांचे चांगले परिणाम होतात.